मधुरचयं, क्ली, (मधुराणां चयम् ।) सिता माक्षिकं सर्पिश्च । इति राजनिर्घण्टः ॥

मधुरत्रिफला, स्त्री, (मधुरा त्रिफला ।) द्राक्षाफलं काश्मर्य्यफलं खर्ज्जूरीफलञ्च । इति राजनिर्घण्टः ॥

मधुरनिस्वना, स्त्री, (मधुरो निस्वनो यस्याः ।) मधुरस्वरयुक्ता नारी । इति त्रिकाण्डशेषः ॥

मधुरफलः, पुं, (मधुरं फलमस्य ।) राजवदरः । इति राजनिर्घण्टः ॥

मधुरवल्ली, स्त्री, (मधुरा वल्लीति नित्यकर्म्मधारयः ।) मधुवीजपूरः । इति राजनिर्घण्टः ॥

मधुरसः, पुं, (मधुर्मधुरो रसोऽस्य ।) इक्षुः । इति शब्दमाला ॥ तालः । इति राजनिर्घण्टः ॥

मधुरसा, स्त्री, (मधुर्मधुरो रसो यस्याः ।) मूर्व्वा । इत्यमरः । २।४।८३ ॥ (अस्याः पर्य्यायो यथा,
"तेजनी पिलुनी देवी तिक्तवल्ली पृथक्‌त्वचा ।
मधुश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ॥
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
द्राक्षा ॥ (तत्पर्य्यायो यथा,—
"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
दुग्धिका । इति मेदिनी । से, ६० ॥ गम्भारी । इति भावप्रकाशः ॥

मधुरस्रवा, स्त्री, (मधुरस्य मधुररसस्य स्रवो यस्याः ।) पिण्डखर्ज्जूरी । इति राजनिर्घण्टः ॥

मधुरा, स्त्री, (मधुर + टाप् ।) शतपुष्पा । (अस्याः पर्य्यायो यथा,—
"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छत्रा संहिता छत्रिकापि च ।
छत्रा शालेयशालीनौ मिश्रेया मधुरा मिषिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मिश्रेया । मथुरानगरी । मधुकर्कटिका । मेदा । मधूली । मधुयष्टिका । इति मेदिनी । रे, १६४ ॥ काकोली । शतावरी । बृहज्जीवन्ती । पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

मधुराम्लकः, पुं, (मधुरश्चासौ अम्लश्चेति नित्यकर्म्मधारयः । ततः स्वार्थे कन् ।) आम्रातकः । इति शब्दचन्द्रिका ॥

मधुराम्रफलः, पुं, (मधुरं मिष्टं आम्रवत् फलं यस्य ।) रेफलः । तत्पर्य्यायः । आरः २ । इति रत्नमाला ॥

मधुरालापा, स्त्री, (मधुरः श्रुतिसुखकरः आलापः शब्दो यस्याः ।) शारिका । इति राजनिर्घण्टः ॥

मधुरालाबुनी, स्त्री, (अलावू + बाहुलकात् नक् । पृषोदरादित्वात् ह्रस्वः ङीष् च । ततः मधुरा चासौ अलाबुनी चेति नित्यकर्म्मधारयः ।) राजालावुः । इति राजनिर्घण्टः ॥

मधुरिका, स्त्री, (मधुर + स्वार्थे कन् + स्त्रियां टाप् अत इत्वञ्च ।) क्षुपविशेषः । मौरी इति भाषा । तत्पर्य्यायः । शालेयः २ शीतशिवः ३ छत्रा ४ मिश्री ५ मिश्रेया ६ । इत्यमरः । २।४।१०५ ॥ सालेयः ७ मिसिः ८ मिसी ९ मिषिः १० । इति तट्टीका ॥ अवाक्‌पुष्पी ११ मङ्गल्या १२ मधुरा १३ । इति रत्नमाला ॥ मधुरी १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । रोचकत्वम् । शुक्रकारित्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मधुरिपुः, पुं, (मधोरसुरविशेषस्य रिपुर्नाशकत्वात् ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा गीतगोविन्दे । २ । ९ ।
"श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ॥")

मधुरेणुः, पुं, (मधुर्मधुरो रेणुरस्य ।) कटभीवृक्षः । इति राजनिर्घण्टः ॥

मधुरोदकः, पुं, (मधुराणि उदकानि यस्य ।) जलसमुद्रः । स तु स्वादूदकमयः पुष्करद्वीपवेष्टितः सप्तसमुद्राणां शेषसमुद्रः । इति जटाधरः ॥

मधुलं, क्ली, (मधु पुष्परसादिकं लाति स्वकारणत्वेन गृह्णातीति । ला + कः ।) मद्यम् । इति शब्दचन्द्रिका ॥ (निर्व्विषीकर्त्री मधुविद्यायां स्त्री । यथा, ऋग्वेदे । १ । १९१ । १० ।
"सोचिन्नुनमरातिनो वयं मरामारे
अस्य योजनं हरिष्ठामधुत्वामधुला चकार ॥"
"हे विष ! त्वा त्वां मधु अमृतं चकार विषस्य विषभावं दूरेऽपनोदास्तीचकारेति एवमेवं मधुला मधुदात्री निर्विषीकर्त्री मधुविद्या यद्वेतदादित्यस्य मण्डले विषयोजनं तेन चाम्रतीकरणं यदस्ति एषा मधुविद्या ॥" इति तद्भाष्ये सायनः ॥)

मधुलयः, पुं, (मधुर्मधुररसो लयोऽत्र ।) रक्तशोभाञ्जनः । इति रत्नमाला ॥

मधुलता, स्त्री, (मधुप्रधाना लतेति मध्यलोपी कर्म्मधारयसमासः ।) मूलीदृणम् । इति राजनिर्घण्टः ॥

मधुलिका, स्त्री, (मधुल + संज्ञायां कन् । टाप् अत इत्वञ्च ।) राजिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या राजिका शब्दे ज्ञातव्या ॥ स्कन्दानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । १६ ।
"पृथवक्त्रा मधुलिका मधुकुम्भा तथैव च ॥")

मधुलिट्, [ह्] पुं, (मधु लेढि आस्वादयतीति । लिह् + क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, रघुवंशे । ९ । २९ ।
"मधुलिहां मधुदानविशारदा
कुरवका रवकारणतां ययुः ॥")

मधुलेही, [न्] पुं, (मधु लेढीति । मधु + लिह् + णिनिः ।) भ्रमरः । इति शब्दरत्नावली ॥ (यथा, भट्टिकाव्ये । २ । ७ ।
"इत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ॥")

मधुलोलुपः, पुं, (मधुनि लोलुपः ।) भ्रमरः । इति राजनिर्घण्टः ॥

मधुवनं, क्ली, (मधुना तन्नाम्ना दैत्येन कृतं वनम् । मध्यपदलोपी कर्म्मधारयः ।) मथुराया वनविशेषः । यथा, श्रीभागवते ४ । ८ । ४२ ।
"तत्तात ! गच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥"
(मधुप्रधानं वनमिति ।) किष्किन्धायां सुग्रीवस्य वनविशेषः । इति रामायणे किष्किन्धाकाण्डम् ॥ (यथा, महाभारते । ३ । २८१ । २७ ।
"वालिना रक्षितं यत्तत् स्फीतं मधुवनं महत् ।
त्वया च प्लवगश्रेष्ठ ! तद्भुक्तं पवनात्मजः ॥")

मधुवनः, पुं, (मधौ वनति शब्दायते इति । वन + अच् ।) कोकिलः । इति शब्दचन्द्रिका ॥

मधुवल्ली, स्त्री, (मधुप्रधाना वल्ली ।) यष्टीमधु । क्लीतनकम् । इति राजनिर्घण्टः ॥ (कारवेल्लकम् । तत्पर्य्यायो यथा,—
"तोयवल्ली राजवल्ली मधुवल्ली कारवेल्लकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुवारः, पुं, (मधुनो मद्यस्य वारः समयः पर्य्यायो वा ।) मधुक्रमः । इत्यमरः । २।१०।४१ ॥ स च पुनः पुनर्मद्यपानपरिपाटी । इति तट्टीकायां भरतः ॥

मधुवीजः, पुं, (मधु मधुरं वीजं यस्य ।) दाडिमः । इति राजनिर्घण्टः ॥ (गुणादिविवरणमस्य दाडिमशब्दे द्रष्टव्यम् ॥)

मधुवीजपूरः, पुं, (मधूनां मधुपूर्णानां वीजानां पूरः समूहो यत्र ।) मधुकर्कटिका । मीठा बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः । मधुपर्णी २ मधुरकर्कटी ३ मधुरवल्ली ४ मधुकर्कटी ५ मधुरफला ६ महाफला ७ वर्द्धमाना ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहनाशित्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । पथ्यत्वम् । गुरुत्वम् । दुर्ज्जरत्वञ्च । इति राजनिर्घण्टः ॥

मधुव्रतः, पुं, (मधु मधुसञ्चयो व्रतं व्रतमिव सततानुष्ठानीयं यस्य । यद्वा, मधु व्रतयति नियतं भुङ्क्ते इति । व्रति + अण् ।) भ्रमरः । इत्यमरः । २।५।२९ ॥ (यथा, भागवते । ३।२८।२८ ।
"मालां मधुव्रतवरूथगिरोपघुष्टाम् ॥"
मध्वर्थं व्रतं कर्म्म यस्य । उदकार्थकर्म्मणि, त्रि । यथा, ऋग्वेदे । ६ । ७० । ५ ।
"मधुनो द्यावापृथिवी मिमिक्षतां मधुश्चुता पयुदुघे मधुव्रते ॥"
"मधुव्रते उदकार्थकर्म्माणौ ।" इति तद्भाष्ये सायनः ॥)

मधुशर्करा, स्त्री, (मधुजाता शर्करा ।) मधुजातशर्करा । सिताखण्ड इति भाषा ॥ यथा,—